International Journal of Research in Social Sciences
Vol. 11 Issue 06, June 2021
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# वास्तुशास्त्रदृष्ट्याशालानिर्माणम् एवं तस्य भेदः

**डॉ. विश्वरञ्जनपतिः**
**ज्योतिषविभागः**
**केन्द्रीयसंस्कृतविश्वविद्यालयः**
**श्रीसदाशिवपरिसरः, पुरी**

मानवजीवने वेदवेदाङ्गोपाङ्गनां महत्त्वपूर्ण स्थानमस्ति । तत्र वैदिकसाहित्ये प्रतिपादितमस्ति तत्र "इष्टप्राप्तयेऽनिष्टपरिहाराय लौकिकं चालौकिकमुपायं वेदयति यो शब्दराशिः स वेदः ।" प्राचीनकालादारभ्य अद्यावधि चत्वारो वेदाः प्रतिद्धाः यथा ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च। एतेषां चतुर्णां वेदानां क्रमेण आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, स्थापत्यवेदश्चेति चत्वारउपवेदाः। वेदपुरूषस्य षडागेषु शब्दशास्त्रं, ज्योतिषशास्त्रं, निरूक्त, कल्पः, शिक्षा, छन्दश्च वर्त्तते। एषु वेदाङ्गेषु ज्योतिषशास्त्रस्य नेत्ररूपेण परिगणना विद्यते।
संहिता स्कन्धे समष्टिरूपेण भूगर्भविज्ञान-वनस्पतिविज्ञान-मुहूर्तविज्ञान-वास्तुविज्ञानादि विषयाणां विस्तृतरूपेण विवेचनं भवति। वास्तुशास्त्रं ज्योतिषसंहितान्तर्गतमस्ति। वास्तुमण्डलोपरि विभिन्नानामधिपतिदेवानां प्रकल्पनेन शाकं सूर्यादि ग्रहणमपि कल्पना क्रियते। आधारस्वरूपं भवति वास्तुमण्डलम्। तदुपरि विश्वनियन्तृ देवानां निवासः भवति । कस्मिन् क्षेत्रे, नक्षत्रे, मासे, तिथौ च भवनकार्यारम्भो विधेयः निवेश्यवस्तुनः, दिक् सामुख्यादिकं कीदृक् भवेत्? शिलान्यासाय का वेला शुभो भवति एषां प्रश्नानां समाधानं ज्योतिषशास्त्रे मिलति। एतत् सर्वं ज्योतिषम्। अत एव तु वास्तुशास्त्रं ज्योतिषशास्त्रस्याङ्ङ्गभूतम् । यथोक्तं समराङ्गणसूत्राधारे –

**चतुः प्रकारं स्थापत्यमष्टधा च चिकित्सम् ।**
**धनुर्वेदश्च स्पताङ्गो ज्योतिषं कमलालयात्[१] ।।**

वास्तुशास्त्रस्य अर्थः, परम्परा, प्रवृत्तिश्च –
वास्तुशब्दस्य निर्वचनं प्रस्तुयता भगवता यास्काचार्येणोक्तम्- "वास्तुर्वसतेर्निवासकर्मणः" इति। पाणिनीयव्याकरणस्य वस् निवासे इत्यस्माद्धातोः "वसेस्तुन् णिच्च" इति सूत्रेण च "वस" धातोः तुन् प्रत्यये कृते सति वस्तुशब्दो निष्पद्यते। णित्वादादिवृद्धश्च, तेन "वास्तु" इति शब्दो निष्पद्यते।
वासयोगस्य स्थानस्यावश्यकता सर्वेभ्योऽपि देव-दानव-मानव-पशु-पक्षि-कीट-पतङ्ग-पिपीलिका- लता-गुल्मवृक्ष-वनस्पत्यन्नौषध्यादिभ्यः वर्तते एव। यतस्तु यत्र यो वसति तदेव तस्य वास्तु, वास्तुशास्त्रस्य अपरं नाम विश्वकर्मशास्त्रम्, स्थापत्यशास्त्रम्, शिल्पशास्त्रम्।

**गृहनिर्माणम् –**

जीवननिर्वाहाय सुव्यवस्थितगृहस्य आवश्यकता, आवासाय समेषां जीवनमाधार-भूतावश्यकता भवति। न केवलं मानवः वसितुमावासव्यवस्थायाः गृहस्य निर्माणं करोति अपितुं इतरप्राणीनः स्व स्व गृहनिर्माणार्थं आवासव्यवस्थां कल्पयन्ति। वास्तुशास्त्रं गृहनिर्माणाकं शास्त्रं विद्यते। गृहनिर्माणेन गृहस्वामिनः स्थितिः कीदृशी भविष्यति विचारणीयाः। अतः परं दिशा, भूमिः, भूखण्डं, नक्षत्राणि योगाः विचारणीयाः। यस्मिन् भूप्रदेशे वनस्पतीनां विकाशो भवेत् यत्र वास्तुशास्त्रमाधारीकृत्य गृहनिर्माणं कर्त्तव्यम्।

**वास्तुविद्यायाः महत्त्वम् –**

जीवनपरिचर्या सम्यकतया परिचालयितुं शीतोष्णादिभिः रक्षणार्थं सुरक्षितगृहं परमावश्यकं विद्यते। प्रायः सर्वेऽपि प्राणिनः विपरीतवातावरणे जीवनरक्षार्थं प्रयतमानाः दृश्यन्ते। विश्वकर्मप्रभृतिभिः वास्तुविद्भिः शीतोष्णवर्षादिभिः मनुष्याणां रक्षणार्थं गृहनिर्माणं निर्दिष्टम्। यथोक्तं राजवल्लभवास्तुशास्त्रे –

**स्त्रीपुत्रादिभोगसौख्यजननं धर्मार्थकामप्रदम्।**
**जन्तुनामयनं सुखास्पदमिदं शीताम्बुधर्मापहम्॥**
**वापीदेवगृहदिपुण्यमखिलं गेहात्समुत्पद्यते।**
**गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः[२]॥**

गृहस्थः गृहं विना कदापि पूर्णत्वं न गच्छति। वस्तुतस्तु चतुर्षु आश्रमेषु गृहस्थाश्रमस्य परिकल्पना गृहकारणादेव समुद्भूता। यदि गृहमेव न स्यात् तर्हि आश्रमस्य परिपूर्तिरेव न भवति। यथोक्तं वास्तुसारे –

**वानप्रस्थो ब्रह्मचारी यतिश्चव तथा द्विजाः।**
**गृहस्थस्य प्रसादेन जीवन्यते यथाविधिः॥**
**गृहस्थ एव यजति गृहस्थस्तप्यते तपः।**
**ददाति च गृहस्थश्च तस्माच्छेयो गृहाश्रमी॥**
**गृहस्थस्य क्रिया सर्वा न सिद्ध्यन्ति गृहं विना।**
**यतस्तस्माद् गृहारम्भकर्म चात्राभिधीयते[३]॥**

चतुर्षु आश्रमेषु गृहस्थाश्रमस्य परिकल्पना गृहकारणादेव समुद्भूता। यदि गृहमेव न स्यात्तदाश्रमस्य परिपूर्तिरेव न भवति। अतो गृहस्थानस्य चयनं गृहनिर्माणञ्च परमावश्यकम्।

**शालानिर्माणम् एवं तस्य भेद :-**

आवासीयदृष्ट्या निर्मितानां भवनानाम् आकृतिः प्रायः वर्गाकारा अथवा आयताकारस्वरूपं श्रेष्ठं मन्यते, परन्तु सार्वजनिकदृष्ट्या यत्निर्माणकार्यं क्रियते तत्राकृतिः भिन्ना-भिन्ना भवति।

तेषां- आकृतिः यथा आङ्ग्लवर्णमालायाः ( L), द्वादशतमो वर्णः ( C), तृतीयः (E), पञ्चमः (O), पञ्चदशः (U)।

एकविंशति वर्णाकृतिरूपा भवन्ति। व्यवसायिकभवनेषु व्यवसायिककेन्द्रम्, सामुदायिकभवनम्, राजकीयशासकीयानि वा भवनानि, चिकित्साकेन्द्राणि, विद्यास्थानानि, च निर्मीयन्ते। सर्वप्रथमं विषयेऽस्मि जिज्ञासा समुत्पद्यते यत् केयं शाला ? अथर्ववेदे बृहद् कक्षस्यैव संज्ञा शालापदेन कृता। शाला शब्दस्य उत्पत्तिः शाखा शब्दात् अभवत् अत एव प्रसिद्धाः शाखाभ्यः शालाश्चैव गृहाणि च।

देशानुसारेण शालानां निर्माणे नैकानि मतानि, तत्र अपि मपख्यतया एकैकशाला संयोज्य द्विशालं, त्रिशालं, चतुश्शालं, पञ्चशालं, षड्शालं, सप्तशालं, अष्टशालं, नवशालं, दशशालं वा विधीयते निर्मियते च। वास्तुशास्त्रग्रन्थे शालाभेदः मुख्यता संख्यायाधारेण क्रियते। वस्तुतः शालानां एतादृशस्य निवेशस्य शालाभेदः मुख्यतया संख्याधारेण क्रियते। तत्र यदिपरिमितिभूखण्डे एकस्यामेव दिशाया यत्र दिशाद्वये निवेशः भवति जद्विशालम् एवमेव दिशात्रये त्रिशालम् दिशाचतुष्टे चतुर्शालं चोच्यते। मतान्तरे तु एकस्यान्दिशि एकशाला, द्विशाला, त्रिषाला, चतुर्शाला, एकशाला द्विशाला चतुर्था संज्ञा प्राप्नोति।

अत्र शालायाः लघुगुरूत्वेन निर्माणप्रक्रिया प्रदता वर्त्तते।

यथोक्तं राजवल्लभमण्डने –

**चत्वारो गुरुवस्तु पूर्वगुरुतोऽधो ह्रस्वतोऽन्ये समाः।**
**भूयः पश्चिमपूरितं च गुरूभर्यविल्लघुत्वं भवेत्॥**
**उद्दिष्टे द्विगुणाङ्ककैर्लघुभवैः संख्यैकमिश्रीकृते।**
**नष्टे स्तो विषमे समे गुरुलघु रूपे तदर्द्धार्द्धतः[४] ॥**

अपि च -

**स्थाने लघोः सद्यमुखादलिन्दं प्रदक्षिणान्तं क्रमतो विदध्यात्।**
**प्रस्तारतः षोडशकं गृहाणां प्रोक्तं तथाख्यां कथयामि तेषाम्[५]॥**

**एकशालगृहम् -**

निर्धारिते भूखण्डे यदा चतुर्दिक्ष एकदिशायां एकद्वारयुतं तच्च सम्पूर्ण गृहं चतुद्वारयुतं भवति तदैकशालम्। एतादृशानां शालानां शाला प्रयोगः प्राचीनकाले राज्ञां भवने स्थापत्ये मन्दिरेषु च भवति श्चतुद्द्वारसमन्वितम् गृहोऽयं मनोरथप्रदं शुभदं कल्याणकरञ्च भवति।

ययथोक्तं वास्तुसौख्ये -

**एकशालागृहं नूनं चतुर्द्वारसमन्वितम्।**
**मनोरथप्रदं गेहं नाम्ना तद्विश्वतोमुखम्[६]॥**

निर्धारिते भूखण्डे एकशालान्तर्गते द्वारनिर्माणपद्धत्या चतुर्विधानां एकशालाभवनानां परिकल्पना कृता विद्यते। तेषु प्रथमः -

१. हस्तिनी (करिणी) शालेयं निर्धारिते भूखण्डे आग्नेयकोणादारभ्य दक्षिणदिशायामुत्तराभिमुखि भवति। आवासीयदृष्ट्या सर्वोत्तमा शाला विद्यते।

२. महिषी – शालेयं नैऋत्यकोणादारभ्य पश्चिमदिशापर्यन्तं भवति। शालायामस्यां पूर्वाभिमुख द्वारं भवति आवासीयदृष्ट्या शालेयमुत्तमा। अत्र मानम् -

**"पूर्वानना च महिषी पितृवारुणस्तया"**

३. गावी – शालेयं वायव्यकोणादंरभ्य उत्तरदिशापर्यन्तं निर्मित भवति तथा च मुख्यः द्वारा दक्षिणाभिमुखी भवति। आवासायी इयं शाला न शुभा।

४. छागी – या शाला ईशानकोणादारभ्य पूर्व विस्तृततया पश्चिमाभिमुखं भवति सा शाला छागी नाम।

**द्विशालगृहम्** –

निर्धारित भूखण्ड ग्रिवाद्वयानां शालानां योगात् यदा भवनं निर्मियत तिदा द्विशालागृहंज जायत अस्य षड्भद्दी-

१. सिद्धार्थम् – हस्तिनीमहिष्योः योगस अर्थात् शालाद्वयाभ्यां यत्भवनं निर्मीय [तिस्य गृहस्य नाम अर्थात् तस्याः द्विशालायाः नाम सिद्धार्थः। सिद्धार्थद्विशालं समस्तमनोरथानां प्रपूरकः समृद्धिदायकश्च भवति।
२. यमसूर्यम् – गावी तथा महिषी [त्यनयोः द्वयोः शालयोः संयोगस यदा नवीना द्विशाला उत्पद्यत तिदा तस्य संज्ञा “यमसूर्यम् [ति”। यमसूर्यशाला आवासार्थं न शुभमिति।
३. दण्डम् – गावीछाग्योः संयोगस या द्विशाला उत्पद्यत [सा दण्डनाम्नी अभिधीयत शाली गृहपतिभ्यो अर्थक्षयकारिणी भवति।
४. काचम् – गावी हस्तिनी [त्तियनयोः द्वयोः योगस यस्याः शालायाः निर्माणं जायत तिम्याः नाम काचमिति। आवासाय यमपि न शुभा।
५. धनहरम् – गावी हस्तिनी त्यनयोः द्वयोः योगस यस्याः शालोत्पद्यत स्वनामसदृशैवफलदात्री। आवासाय न शुभति शास्त्राभिमतम्।
६. चुल्लीशालम् – महिषीछागयोः द्वयोः संयोगस यत् द्विशालगृहं निर्मीयत अस्यनाम चुल्लीति। आवासाय शालसखेपि न शुभा।

**वास्तुशास्त्रस्योपादर्यता –**

वैदिकपरम्परायां वास्तुशास्त्रम् दिशं शास्त्रं वर्तत यिंत्र मानवजीवन पुरुषार्थं प्राप्त्यर्थं जीवनस्य गतिविधिं च स्वतः स्फुर्त अनक्कीन् नियमान् सिद्धान्तान् च प्रतिपादयति। एतम अस्य शास्त्रस्य महत्वं जनजीवन चि अस्योपयोगिता सिद्ध्यति।


१. **समराङ्गणसूत्रधारः – १०/२७**
२. **राजवल्लभवास्तुशास्त्रम् १/५**
३. **वास्तुसारः १/८, ९,१**
४. **राजवल्लभमण्डम् ६/२**
५. **तत्रैव ६/३**
६. **वास्तुसौख्यम्-७/२५७**